दुर्म्मुखः, पुं, (दुर्निन्दितं मुखं यस्य ।) वानरविशेषः । (यथा, रामायणे । ४ । ३६ । ३३ ।
"अयुतेन वृतश्चैव सहस्रेण शतेन च ।
ततो यूथपतिर्व्वीरो दुर्म्मुखो नाम वानरः ॥")
नागभेदः । इति मेदिनी । खे, १० ॥ (यथा, हरिवंशे । ३ । ११४ ।
"कुहरः पुष्पदंष्ट्रश्च दुर्म्मुखः सुमुखस्तथा ॥")
अश्वः । इति हेमचन्द्रः ।३।१५ ॥ (सर्पः । इति त्रिकाण्डशेषः । ३ । ३ । ५६ ॥) महिषासुरसेनापतिविशेषः । यथा, मार्कण्डेये । ८३ । १६ ।
"दुर्द्धरं दुर्म्मुखञ्चोभौ शरैर्निन्ये यमक्षयम् ॥"
(नृपविशेषः । यथा, महाभारते ।२ । ४ । २१ ।
"संग्रामजिद्दुर्म्मुखश्च उग्रसेनश्च वीर्य्यवान् ॥"
धृतराष्ट्रस्य पुत्त्रविशेषः । यथा, तत्रैव ।१।११७।३।
"दुर्म्मर्षणो दुर्म्मुखश्च दुष्कर्णः कर्ण एव च ॥"
राक्षसविशेषः । यथा, भागवते ।६ । १० । १८ ।
"रक्षःपतिस्तदवलोक्य निकुम्भकुम्भ-
धूम्राक्षदुर्म्मुखसुरान्तनरान्तकादीन् ॥"
यक्षविशेषः । इति ब्रह्मपुराणम् ॥ गणपतेर्गणानामन्यतमः । यथा, महागणपतिस्तोत्रे । ११ ।
"षट्कोणाश्रिषु षट्सु षड्गजमुखाः पाशाङ्कुशाभीरवान्-
बिभ्राणाः प्रमदासखाः पृथुमहाशोणाश्मसुञ्जत्विषः ।
आमोद्रः पुरतः प्रमोदसुमुखौ तं चाभितो दुर्म्मुखः
पश्चात्पार्श्वगतोऽस्य विघ्न इति यो यो विघ्नकर्त्तेति च ॥"
वर्षविशेषः । यथा, ज्योतिषतत्त्वधृतभविष्यपुराणवचनम् ।
"तुषधान्यक्षयो देवि ! सर्व्वशस्यमहार्घता ।
व्यवहाराश्च नश्यन्ति दुर्मुखे दुर्मुखाः प्रजाः ॥")

दुर्म्मुखः, त्रि, (दुर्दुःखजनकं मुखं मुखनिःसृतवचनादिकं यस्य ।) अप्रियवादी । तत्पर्य्यायः । मुखरः २ अबद्धमुखः ३ । इत्यमरः ।३।१।३६ ॥ (अप्रियदर्शनम् । यथा, कथासरित्सागरे । १२ । ५२ ।
"चक्रे वजन्तकस्यापि रूपं दन्तुरदुर्मुखम् ॥")

दुर्म्मूल्यं, क्ली, (दुर्दुःस्थितं मूल्यम् । प्रादिसमासः ।) महार्घम् । इति लोकप्रसिद्धम् ॥

दुर्म्मेधाः, त्रि, (दुर्निन्दिता मेधा धारणावती बुद्धिर्यस्य । "नित्यमसिच् प्रजामेधयोः ।" ५ । ४ । १२२ । इति असिच् ।) मन्दमेधाः । इति व्याकरणम् । (यथा, महाभारते ।३।१०।२६।
"न किञ्चिदुक्ता दुर्म्मेधास्तस्थौ किञ्चिदवाङ्-मुखः ॥")

दुर्म्मोहः, पुं, (दुर्निन्दितो मोहो यस्मात् ।) काकतुण्डी । इति राजनिर्घण्टः ॥

दुर्य्योधनः, पुं, (दुर्दुःखेन युध्यतेऽसौ । युध+"भाषायां शासियुधीति ।" युच् ।) स्वनामख्यातकुरुवंशप्रभवराजविशेषः । स धृतराष्ट्रज्येष्ठपुत्त्रः कुरुपाण्डवयुद्धे भीमेन हतः । तत्पर्य्यायः । कुरुराट् २ गान्धारेयः ३ सुयोधनः ४ । इति त्रिकाण्डशेषः ॥ (अयं कलेरंशेन पृथिव्यामवतीर्णः । यथा, महाभारते ।१ । ६७।८८-८६ ।
"कलेरंशस्तु संजज्ञे भुवि दुर्य्योधनो नृपः ।
दुर्बुद्धिर्दुर्म्मतिश्चैव कुरूणामयशस्करः ॥
जगतो यस्तु सर्व्वस्य विद्विष्टः कलिपुरुषः ।
यः सर्व्वां घातयामास पृथिवीं पृथिवीपते ! ॥")

दुर्लभः, त्रि, (दुर्दुःखेन लभ्यते इति । दुर्+लभ+"ईषद्दुःसुष्विति ।" ३ । ३ । १२६ । इति खल् ।) दुष्प्रापः । इति मेदिनी । भे, १६ ॥ यथा,—
"दुर्लभं प्राकृतं वाक्यं दुर्लभः क्षेमकृत् सुतः ।
दुर्लभा सदृशी भार्य्या दुर्लभः स्वजनः प्रियः ॥"
इति चाणक्ये । ५४ ॥
अतिप्रशस्तः । इति शब्दरत्नावली ॥
"सर्व्वत्र सुलभा गङ्गा त्रिषु स्थानेषु दुर्लभा ।
हरिद्वारे प्रयागे च गङ्गासागरसङ्गमे ॥"
इति कूर्म्मपुराणम् ॥
प्रियः । इति हेमचन्द्रः ॥

दुर्लभः, पुं, (दुर्+लभ+खल् ।) कचुरः । इति मेदिनी । भे,१६ ॥ कर्चुरः । इति राजनिर्घण्टः ॥ (विष्णुः । यथा, महाभारते । १३ । १४६ । ६६ ।
"दुर्ल्लभो दुर्गमो दुर्गो दुरावासो दुरारिहा ॥"
"दुर्ल्लभतया दुर्ल्लभः ।
'जन्मान्तरसहस्रेषु तपोदानसमाधिभिः ।
नराणां क्षीणपापानां कृष्णभक्तिः प्रजायते ।'
इति वचनात् भक्त्या लभ्य इति भगवद्वचनाच्च ।"
इति तत्र शाङ्करभाष्यम् ॥)

दुर्लभा, स्त्री, (दुर्लभ+टाप् ।) श्वेतकण्टकारी । दुरालभा । इति राजनिर्घण्टः ॥

दुर्व्व, ई वधे । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् । ईदित्वात् निष्ठायामनिट् ।) पञ्चमस्वरी । दूः दुरौ दुरः । ई, दूर्णः । इति दुर्गादासः ॥

दुर्व्वचं, त्रि, (दुर्दुःखेन उच्यते । दुर्+वच्+खल् ।) दुःखकथ्यम् । यथा, भारविः । २ । २ ।
"अपि वागधिपस्य दुर्वचं
वचनन्तद्विदधीत विस्मयम् ॥"

दुर्व्वचः, [स्] क्ली, (दुर्निन्दितं वचः ।) मन्दवाक्यम् । यथा,—
"असह्यं दुर्व्वचो ज्ञातेर्मेघान्तरितरौद्रवत् ॥"
इत्युद्भटः ॥
(दुष्टवक्तरि, त्रि ॥)

दुर्व्वर्णं, क्ली, (दुर्निन्दितं सुवर्णाद्यपेक्षयेत्यर्थः वर्णो यस्य ।) रजतम् । इत्यमरः । २ । ६ । ६६ ॥ (यथा, माघे । ४ । २८ ।
"दुर्वर्णभित्तिरिह सान्द्रसुधासवर्णा ॥")
एलवालुकम् । इति मेदिनी । णे, ५२ ॥ मन्दवर्णे, त्रि ॥ (यथा, भागवते । ३ । १४ । ४४ ।
"योगेर्हेमेव दुर्व्वर्णं भावयिष्यन्ति साधवः ॥")

दुर्व्वर्णकं, क्ली, (दुर्व्वर्ण+स्वार्थे संज्ञायां वा कन् ।) रजतम् । इति हेमचन्द्रः ॥

दुर्व्वाक्, [च्] त्रि, (दुर्दुष्टा वाक् यस्य ।) कद्वदः । इति हेमचन्द्रः । ३ । ११ ॥ (यथा, अथर्व्ववेदे । ४ । १७ । ५ ।
"दुर्णाम्नीः सर्व्वा दुर्व्वाचस्ता अस्मन्नाशयामसि ॥")
दुर्दुष्टा वाक् ।) दुष्टवाक्ये, स्त्री ॥ (यथा, महाभारते । २ । ७४ । ८८ ॥
"अतीव जल्पन् दुर्व्वाचो भवतीह विहेठकः ॥")

दुर्व्वादः, पुं, (दुर्दुष्टो वादः ।) स्तुतिपूर्व्वकदुर्व्वाक्यम् । इति जटाधरः ॥ निन्दितवाक्यञ्च ॥

दुर्व्वासाः, [स्] पुं, (दुर्दुष्टं निगूढ़मित्यर्थः वास इव धर्म्मावरणलं यस्य । तथा च महाभारतवचनम् ।
"निगूढ़निश्चयं धर्म्मं यं तं दुर्व्वाससं विदुः ॥")
मुनिविशेषः । स अत्रिमुनिपुत्त्रः शङ्करांशजातः । इति श्रीभागवतम् ॥ (यथा, विष्णुपुराणे । १ । ६ । २ ।
"दुर्व्वासाः शङ्करस्यांशश्चचार पृथिवीमिमाम् ॥")
तत्पर्य्यायः । कृशारणिः २ । इति त्रिकाण्डशेषः ॥ तस्य भार्य्या और्व्वमुनिकन्या कन्दली । इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डम् ॥ (महादेवः । यथा, महाभारते । १३ । १७ । ६२ । तस्य सहस्रनामकीर्त्तने ।
"सात्त्वप्रसादो दुर्व्वासाः सर्व्वसाधुनिषेवितः ॥"
दुर्निन्दितं वासो वस्त्रं यस्य ।) मन्दवस्त्रयुक्ते, त्रि ॥ (यथा, ऋग्वेदे । ७ । १ । १६ ।
"मा नो अग्नेऽवीरते परा दा दुर्व्वाससेऽमतये मा नो अस्यै ॥")

दुर्व्विधः, त्रि, (दुर्दुष्टा विधा यस्य ।) दरिद्रः । इत्यमरः । ३ । १ । ४६ ॥ खलः । इति मेदिनी । धे, २१ ॥ मूर्खः । इति शब्दरत्नावली ॥ (यथा, गोः रामायणे । २ । १०६ । ३० ।
"शास्त्रेष्वन्येषु मुख्येषु विद्यमानेषु दुर्व्विधाः ।
बुद्धिमान्वीक्षिकीं प्राप्य निरर्थान् प्रवदन्ति ते ॥")

दुर्व्विनीतः, पुं, (वि+नी+भावे क्तः । दुर्दुष्टं विनीतं विनयो यस्य । यद्वा, दुर्+वि+नी+क्तः ।) अविनीताश्वः । तत्पर्य्यायः । शूकलः २ । इति हेमचन्द्रः । ४ । ३०१ । अविनीतमात्रे, त्रि ॥ (यथा, पञ्चतन्त्रे । ५ । १७ ।
"कुपुत्त्रोऽपि भवेत् पुंसां हृदयानन्दकारकः ।
दुर्व्विनीतः कुरूपोऽपि मूर्खोऽपि व्यसनी खलः ॥")

दुर्व्वृत्तः, त्रि, (दुर्दुष्टं वृत्तं चरित्रं यस्य ।) दुर्जनः । यथा,—
"दुर्व्वृत्तवृत्तशमनं तव देवि ! शीलम् ॥"
इति चण्डी ॥
दुश्चरित्रे, क्ली । (यथा, महाभारते ।१।१।१०० ।
"दुर्व्वृत्तं धार्त्तराष्ट्राणामुक्तवान् भगवानृषिः ॥")

दुर्हृत्, [द्] त्रि, (दुर्दुष्टं हृदयं यस्य । "सुहृद्दुर्हृदौ मित्रामित्रयोः ।" ५।४।१५० । इति निपातनात् हृदयस्य हृद्भावः ।) शत्रुः । इत्यमरः । २ । ८ । १० ॥ (यथा, मार्कण्डेये । २६ । ३४ ।